*Quest Journals*
*Journal of Research in Humanities and Social Science*
*Volume 9 ~ Issue 8 (2021)pp: 14-15*
*ISSN(Online):2321-9467*
*www.questjournals.org*

**Research Paper**

# "मोक्षदायकंक्षेत्रं श्रीक्षेत्रं'

Dr.Manasi Ratha
*Lecture in Dharma Shastra,At : Bagdevi Sanskrit College,Daliji,Kendrapara,Odisha*

*Received 14 August, 2021; Revised: 26 August, 2021; Accepted 28 August, 2021 © The author(s) 2021. Published with open access at www.questjournals.org*

**ABSTRACT :** प्राचीनकालादारभ्य उत्कलस्य यानि तीर्थक्षेत्राणि अद्यावधि विद्यमानानि सन्ति तानि समालोच्यन्ते । सर्वभारतीयतीर्थमध्ये यद्यापि उत्कलस्य तीर्थानि समागच्छन्ति तथापि न मया तेषामालोचनं विहितम् । उत्कले विद्यमानानां तीर्थानां यद्यापि बहुमहत्वं विद्यते तेषु सर्वेष्वापि परिदृश्यमानानां चतुर्णां तीर्थानां प्रमुखता सर्वभारतीयस्तरे अस्माभिरनुभूयते । तेषु एकस्य तीर्थस्य माहीत्म्यं वैशिष्ट्यं गुरुत्वश्च विश्वस्तरे विद्यते । न केवलं हिन्दुधर्मानुरागिणां जनानां क्षेत्रमिदं तथा महत्त्वपुर्णं प्राणभूतमपि तु समग्रस्य मानवसमाजस्य क्षेत्रमिदं भवति । तदेव क्षेत्रं भवति श्रीजगन्नाथक्षेत्रं श्रीक्षेत्रं वा श्रीपुरुषोत्तमक्षेत्रम् ।

REFERENCE: Dr.Atul Kumar Nanda ( Book-"TIRTHASARASAMGRAHA"), Dr.Narayanan.E.R ( Book-"PRABANDHASAMMUCHHAYA"),Dr.Jan Gonda ( Book-"MEDIEVAL RELIGIOUS LITERATURE IN SANSKRIT"),Dr.Dayanidhi Mishra ( Book-"SAMSKARAVIMARSH")

चतुर्षु मुख्यतीर्थक्षेत्रेषु अस्य श्रीजगन्नाथधाम्न: महत्त्वमं सर्वाग्रगण्यं वर्त्तते । मोक्षदायकं क्षेत्रं श्रीक्षेत्रमिति सर्वे जानान्ति । क्षेत्रेस्मिन् भगवान् जगत: नाथ: श्रीजगन्नाथ: लीलादारवरूपं घृत्वा अपादपाणिश्च भूत्वा भ्रात्रा भगिन्या सह प्रपूजितो भवति । क्षेत्रस्यास्य अपरं नाम शङ्खक्षेत्रमिति । अस्मिन् शङ्खक्षेत्रे हिन्दधर्मस्य सर्वेषां देवानां देवीनां च अवस्थिति: प्राप्यते । भगवत: जगन्नाथस्य यत् प्रसादं भवति , तत्प्रसादं महाप्रसादमित्युच्यते ।

मन्दिरस्य प्राचीनता जगन्नाथसंस्कृते: प्राचीनता च
सर्वत्र स्वीकृता विद्यते । स्कन्दादिषु पुराणेषु जगन्नाथक्षेत्रस्य वर्णनं प्राप्यते । श्रीजगन्नाथमन्दिरं महाराजेन इन्द्रद्युम्नेन कृतयुगे कृतम् । महाराजस्य निमन्त्रणेन प्रजापतिना मन्दिरस्यास्य प्रतिष्ठा
विहिता । कालक्रमेण मन्दिरं तु वालुकया
अवलुप्तम् । तत: दृश्यमानं मन्दिरं तु एकादशशताब्द्यामनङ्गभीमदेवेन उत्कलनृपतिना निर्मितम् ।

मन्दिरेस्मिन् द्वादशमासेषु बहव:उत्सवा: परपालिता
भवन्ति । सर्वेषूत्सवेषु रथोत्सव: मुख्यतम: । यस्मिन्नुत्सवे स्वयं श्रीजगन्नाथ: पतितानां पावनाय श्रीमन्दिरात्रि: सरति । स्यन्दनेनोपविश्य गुण्डिचामन्दिरं प्रति गच्छति । भ्रातु: बलरामस्य स्यन्दनं तु दर्पदलनं यत्र द्वादशचक्राणि भवन्ति । रथप्रतिष्ठानन्तरं सेवका: जगन्नाथं बलभद्रं सुभद्रां च रथं प्रति आनीय स्थापयन्ति । तत: नवकोटिकर्णाटोत्कलवर्गश्वरवीराधिवीरवरमहाप्रतापिराजा विनीतेन वेशाभरणेन सामान्यसेवक इव रथमार्जनं करोति । तदनन्तरं भक्ता: क्रमानुसारं ज्येष्ठस्य भ्रातु: बालभद्रस्य भगिन्या: सुभद्रया परिशेषे श्रीजगन्नाथस्य रथं महानन्देन नयन्ति । उच्यते च-
" रथे तु वामनं दृष्टा पुनर्जन्म न विद्यते । "
अत एव इयं यात्रा अत्यन्तं प्रसिद्धा भवति ।

भगवतः जगन्नाथस्य स्नानयात्रा ज्येष्ठपूर्णिमायां भवति । ततः अमावास्यायां भगवतः नेत्रोत्सवो भवति । द्वितीॆयायां रथयात्रा । अपरायात्रा भवति चन्दनयात्रा ।

चन्दनयात्रानिमित्तं श्रीजगन्नाथः स्वयं न गच्छति । स्वप्रतिनिधिरूपेण मदनमोहनं प्रषयन्ति । अयं च उत्सवः अतीव रमणीयः । सुसज्जितेन विम्मानेन श्रीमन्दिरात् देवता नयनं मार्गे संकीर्त्तनं नरेन्द्रपुष्करिण्यां सुसज्जितासु नौकासु जलक्रीडा अतीव मनोहारिणी भवति । इयं यात्रा एकविंशदिनानि यावत् प्रचलति ।

श्रीजगन्नाथक्षेत्रं प्रति आदिशङ्कराचार्यः
आगतवान् । श्रीजगन्नाथस्य परमप्रीतये जगन्नाथाष्टकं तेन विरचितम् । श्रीजगन्नाथस्य तीर्थक्षेत्रस्य महत्त्वं प्रविचार्य गोवर्द्धनपीठनाम्ना एकं शङ्कराचार्याश्रममादिशङ्कराचार्यः स्थापितवान् । यस्तु समग्रभारतवर्षे विद्यमानेषु चतुर्षु शङ्कराचार्यमठेषु गोवर्द्धनाश्रमः श्रेष्ठतमः । श्रीकृष्णतत्त्वस्य सर्वश्रेष्ठः प्रचारकः सिद्धमहापुरुषः श्रीचैतन्यदेवः अत्रैव पुरीक्षेत्रे जगन्नाथदर्शननिमित्तमागतवान् । अन्तिमजीवनमपि क्षेत्रेस्मिन् व्ययितमः । अपरेपि अनेके महापुरुषाः श्रीजगन्नाथक्षेत्रं प्रति आगतवन्तः ।

श्रीक्षेत्रस्थितानां तीर्थक्षेत्राणां मध्ये अन्यतमः देवालयो भवति श्रीलोकनाथमन्दिरम् । ततश्च गुण्डिचामन्दिरं , सुवर्णगोपालमन्दिरं , स्वर्गद्वारश्मशानं , श्वेतगङ्गापुष्करिणी , इन्द्रद्युम्नपुष्करिणी , मार्कण्डेयपुष्करिणी ,चक्रतीर्थ , सिद्धमहावीरमन्दिरं , गोपीनाथमन्दिरं , वेलेश्वरमहादेवमन्दिरं श्रीक्षेत्रस्थितानि तीर्थक्षेत्राणि भवन्ति । एतस्य प्रत्येकं क्षेत्रस्य महिमागानं फलप्राप्तिविषये बहुनि फलश्रुतिवाक्यानि विद्यन्ते । आस्तिकभावना एतेषां तीर्थानां दर्शनेन , स्नानेन , पूजनेन ,जनः पापात् रोगात् संसाराच्च विमुक्तो भवति । श्रीजगन्नाथपुरुषोत्तम-तीर्थक्षेत्रविषये ब्रहमपुराणे बृहन्नारदीये , स्कन्दपुराणे बहुनि वचनानि प्राप्यते।